# Anekavishayamuktakashlokah

# अनेकविषयमुक्तकश्लोकाः

## Document Information

Text title : Anekavishaya Muktaka Shlokah

File name : anekaviShayamuktakashlokAH.itx

Category : misc

Location : doc_z_misc_general

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : Ramanuja Stotramala

Latest update : November 23, 2019, July 5, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 5, 2021

*sanskritdocuments.org*

# अनेकविषयमुक्तकश्लोकाः

अनेकपूर्वाचार्यैरनुगृहीताः
श्रीरस्तु ।
श्रीमते हयग्रीवाय नमः ।
श्रीमते रामानुजाय नमः ॥

यस्य प्रसादकलया बधिरः शृणोति
    पङ्गुः प्रधावति जवेन च वक्ति मूकः ।
अन्धः प्रपश्यति सुतं लभते च वन्ध्या
    तं देवमेव वरदं शरणं गतोऽस्मि ॥ १॥

आशैलादद्रिकन्याचरणकिसलयन्यासधन्योपकण्ठात्
    आरक्षोनीतसीतामुखकमलसमुल्लासहेतोश्च सेतोः ।
आ च प्राच्यप्रतीच्यक्षितिधरयुगलाच्चन्द्रसूर्यावतंसात्
    मीमांसाशास्त्रयुग्मश्रमविमलमना मृग्यतां मादृशोऽन्यः ॥ २॥

न वयं कवयस्तु केवलं न वयं केवलतन्त्रपारगाः ।
अपि तु प्रतिवादिवारणप्रकटाटोपविपाटनक्षमाः ॥ ३॥

वन्दे गोविन्दतातौ मुनिमथ मनवै लक्ष्मणार्यं महान्तं
    ध्यायेयं यामुनार्यं मम हृदि तनवै  राममेवाभियायाम् ।
पद्माक्षं प्रेक्षिषीय प्रथममपि मुनिं नाथमीडे शठारिं
    स्तौमि प्रेक्षेय लक्ष्मीं शरणमशरणः श्रीधरं संश्रयेयम् ॥ ४॥

स्वं मेऽहं मे कुतस्तत् तदपि कुत इदं वेदमूलप्रमाणात्
    एतच्चानादिसिद्धादनुभवविभवात् सोऽपि साक्रोश एव ।
क्वाक्रोशः कस्य गीतादिषु मम विदितः कोऽत्र साक्षी सुधीः स्यात्
    हन्त त्वत्पक्षपाती स इति नृकलहे मृग्यमध्यस्थवत् त्वम् ॥ ५॥

अविद्यातो देवे परिवृढतया वा विदितया

स्वभक्तेर्भूम्ना वा जगति गतिमन्यामविदुषाम् ।
गतिर्गम्यश्चासौ हरिरिति जितन्ताह्वयमनोः
रहस्यं व्याजह्रे स खलु भगवान् शौनकमुनिः ॥

पुरा सूत्रैर्व्यासः श्रुतिशतशिरोर्थं ग्रथितवान्
विवव्रे तं श्राव्यं वकुलधरतामेत्य स पुनः ।
उभावेतौ ग्रन्थौ घटयितुमलं युक्तिभिरसौ
पुनर्जज्ञे रामावरज इति स ब्रह्ममुकुरः ॥ ७॥

अर्वाञ्चो यत्पदसरसिजद्वन्द्वमाश्रित्य पूर्वे
मूर्ध्ना यस्यान्वयमुपगता देशिका मुक्तिमापुः ।
सोऽयं रामानुजमुनिरपि स्वीयमुक्तिं करस्थां
यत्सम्बन्धादमनुत कथं वर्ण्यते कूरनाथः ॥ ८॥

देवाधीशनृसिंहपाण्डवमहादूतप्रवालप्रभान्
श्रीवैकुण्ठपतिं त्रिविक्रमहरिं नीरेशमेघेश्वरौ ।
नीलव्योमविभुं महोरगहरिं ज्योत्स्नेन्दुवक्त्रं हरिं
चोरेशं कृतचिन्तभक्तहृदयावासं मुकुन्दाह्वयम् ॥

कामावासपतिं नृकेसरिवरं दीपप्रकाशप्रभुं
श्रीयुक्ताष्टभुजास्पदेशमनघं श्रीमद्यथोक्तक्रियम् ।
इत्यष्टादशदिव्यमङ्गलवपुर्देवान् सरोयोगिना साकं
निस्तुलकाञ्च्यभिख्यनगरीनाथान् नमामस्सदा ॥

श्रीमद् द्वारवरं महद्धि बलिपीठाग्र्यं फणीन्द्रह्रदं
गोपीनां रमणं वराहवपुषं श्रीभट्टनाथं मुनिम् ।
श्रीमन्तं शठवैरिणं कलिरिपुं श्रीभक्तिसारं मुनिं
पूर्णं लक्ष्मणयोगिनं मुनीवरानाद्यानथ द्वारपौ ॥

श्रीमन्मज्जनमण्डपं सरसिजां हेतीशभोगीश्वरौ
रामं नीलमणिं महानसवरं तार्क्ष्यं नृसिंहं प्रभुम् ।
सेनान्यं करिभूधरं तदुपरि श्रीपुण्यकोट्यां हरिं
तन्मध्ये वरदं रमासहचरं वन्दे तदीयैर्वृतम् ॥

काषायशोभि कमनीयशिखानिवेशं
दण्डत्रयोज्ज्वलकरं विमलोपवीतम् ।
उद्यद्दिनेशनिभमुल्लसदूर्ध्वपुण्ड्रं

रूपं तवास्तु यतिराज ! दृशोर्ममाग्रे ॥ ११॥

नमः प्रणवशोभितं नवकषायखण्डाम्बरं
त्रिदण्डपरिमण्डितं त्रिविधतत्त्वनिर्वाहकम् ।
दयाञ्चितदृगञ्चलं दलितवादिवाग्वैभवं
शमादिगुणसागरं शरणमेमि रामानुजम् ॥ १२॥

एतानि तानि भुवनत्रयपावनानि
संसाररोगशकलीकरणौषधानि ।
जिह्वातले मम लिखानि यथा शिलायां
रामानुजेति चतुराण्यमृताक्षराणि ॥ १३॥

इति अनेकविषयमुक्तकश्लोकाः समाप्ता ।

Proofread by Aruna Narayanan narayanan.aruna at gmail.com

*Anekavishayamuktakashlokah*
pdf was typeset on July 5, 2021

Please send corrections to *sanskrit@cheerful.com*